मोक्षे श्रीवामनानन्त शरणागतवत्सल ॥" इति ॥
"एकादश्यां रजन्यां वा द्वादश्यां वार्च्चयेत्
प्रभुम् ।
स्वर्णरूप्यमये पात्रे ताम्रवंशमयेऽपि वा ॥
कुण्डिकां स्थापयेत् पार्श्वे छत्रिकापादुकास्तथा ।
गुणांश्च वैणवीं यष्टिमक्षसूत्रं पवित्रकम् ॥
पुष्पैर्गन्धैः फलैर्धूपैः प्रदीपैश्चार्च्चयेद्धरिम् ।
नानाविधैश्च नैवेद्यैर्भक्ष्यभोज्यैर्गुड़ौदनैः ॥
जागरं निशि कुर्व्वीत गीतवादित्रनर्त्तनैः ।
एवमाराध्य देवेशं प्रभाते विमले सति ॥
आदावर्घ्यं प्रदातव्यं पश्चाद्देवं प्रपूजयेत् ।
नारिकेलेन शुभ्रेण दद्यादर्घ्यञ्च पूर्व्ववत् ॥"
तत्र मन्त्रः ।
"वामनाय नमस्तुभ्यं क्रान्तत्रिभुवनाय च ।
गृहाणार्घ्यं मया दत्तं वामनाय नमोऽस्तु ते ॥"
वामनाय अर्घ्यं नमः ।
"मत्स्यं कूर्म्मं वराहञ्च नरसिंहञ्च वामनम् ।
रामं रामञ्च कृष्णञ्च क्रमात् द्वौ बुद्धकल्किनौ ॥
पादयोर्जानुनोर्गुह्ये नाभ्यामुरसि कण्ठयोः ।
भुजयोर्म्मूर्द्ध्नि सर्व्वाङ्गेष्वर्च्चयेदायुधानि च ॥
महापूजां ततः कृत्वा गोमहीं काञ्चनादिकम् ।
शक्त्याचार्य्याय दातव्यं ब्राह्मणेभ्यश्च मन्त्रतः ॥
ब्राह्मणश्चापि मन्त्रेण प्रतिगृह्णाति मन्त्रवित् ।
ददाति मन्त्रतो यश्च दाता भक्तिसमन्वितः ॥"
तत्र दानमन्त्रः ।
"वामनो बुद्धिदो दाता द्रव्यस्थो वामनः स्वयम् ।
वामनश्च प्रतिग्राही तेन मे वामने रतिः ॥
वामनः प्रतिगृह्णाति वामनोऽपि ददाति च ।
वामनस्तारको द्वाभ्यां तेनेदं वामने नमः ॥"
इति ॥
"एवं कृत्वा विधानेन भोजनं एकदान्यकम् ।
पूर्व्वं दद्याद्ब्राह्मणेभ्यः पश्चाद्भुञ्जीत बन्धुभिः ॥
यद्वामनपुराणे च यद्भविष्योत्तरे व्रतम् ।
वामनस्योदितं तस्यानुसाराल्लिखितं त्विदम् ॥"
ब्रह्मवैवर्त्ते ।
"गृहीत्वा नियमं प्रातर्गत्वा नद्योश्च सङ्गमे ।
सौवर्णं वामनं कृत्वा सौवर्णमाषकेण वा ॥
यथाशक्त्याथ वित्तस्य कुम्भोपरि जगत्पतिम् ।
स्वर्णपात्रे स्थापयित्वा मन्त्रैरेतैश्च पूजयेत् ॥
ॐ वामनाय नमः पादौ कटिं दामोदराय च ।
ऊरू श्रीपतये गुह्यं कामदेवाय पूजयेत् ॥
पूजयेज्जगतां पत्युरुदरं विश्वधारिणे ।
हृदयं योगनाथाय कण्ठं श्रीपतये नमः ॥
मुखञ्च पङ्कजाक्षाय शिरः सर्व्वात्मने नमः ।
इत्थं संपूज्य वासोभिराच्छाद्य च जगद्गुरुम् ।
दद्यात् सुश्रद्धया चार्घ्यं नारिकेलादिभिः फलैः ॥
ॐ नमो नमस्ते गोविन्द बुध श्रवणसंज्ञक ।
अघौघसङ्क्षयं कृत्वा प्रेतमोक्षप्रदो भव ॥"
इत्यर्घ्यमन्त्रः ॥
"छत्रोपानद्गोदानं दद्याच्च कमण्डलुम् ।
विशेषेण द्विजाग्र्याय वामनः प्रीयतामिति ॥
दध्योदनसमायुक्तां वारिधानीं प्रदापयेत् ।
पूजयित्वा जगन्नाथं वामनः प्रीयतामिति ॥
यथाशक्त्या च दानानि द्विजाग्र्येभ्यः प्रदापयेत् ।
कुर्य्याज्जागरणं रात्रौ गीतशास्त्रसमन्वितम् ॥
श्रद्धया परया युक्तो निशामनिमिषेच्चलः ।
प्रभाते भोजयेद्विप्रान् द्वादश्यां पारणं ततः ।
कुर्य्यात् स्वयं श्रद्धया तत् सर्व्वं सफलतां व्रजेत् ॥"
तस्माद्वाक्याच्च तत्रैव ।
"एवं कृते तु कौन्तेय व्रतेऽस्मिन् विजयादिने ।
न दुर्लभतरं किञ्चिदिह लोकेऽथवा परे ॥
फलमस्य व्रतस्योक्तं दत्त्वा पितॄन्नरोत्तमः ।
वंशोद्धारकरो मुक्तिं याति पैत्र्यादृणादपि ॥
न पावनतरं किञ्चिदतः परमिहोच्यते ।
विजयाव्रततुल्यञ्च न परं परिपठ्यते ॥"
भविष्योत्तरे च ।
"समाप्ते तु व्रते तस्मिन् यत् पुण्यं तन्निबोध मे ।
चतुर्युगानि राजेन्द्र ! सप्तसप्ततिसङ्ख्यया ॥
प्राप्य विष्णुपुरं राजन् क्रीड़ते कालमक्षयम् ।
इहागत्य भवेद्राजा प्रतिपक्षभयङ्करः ॥
हस्त्यश्वरथयानानां दाता भोक्ता विमत्सरः ।
रूपसौभाग्यसम्पन्नो दीर्घायुर्निरुजो भवेत् ।
पुत्त्रपौत्त्रैः परिवृतो जीवेच्च शरदां शतम् ॥"
इति श्रीहरिभक्तिविलासे १५ विलासः ॥
वामनेत्रं, क्ली, (वर्णन्यासे वामं नेत्रं स्वरूपं येन ।)
दीर्घईकारः । यथा,—
"ईश्वरस्त्रिमूर्त्तिर्म्महामाया लोलाक्षी वामलोच-
नम् ।"
इत्यादि वर्णाभिधानम् ॥
अपि च ।
"ईशो वैश्वानरस्थः शशधरविलसद्वामनेत्रेण
युक्तो
बीजन्ते द्वन्द्वमन्यद्विगलितचिकुरे कालिके ये
जपन्ति ।"
इति तन्त्रसारे महाकालविरचितं श्यामा-
स्तोत्रम् ॥ (वामचक्षुः ।)
वामलूरः, पुं, (वामं यथा तथा लुनातीति । लू +
बाहुलकात् रक् ।) वल्मीकः । इत्यमरः । २ ।
१ । १४ ॥ (यथा, काशीखण्डे । २२ । १९ ।
"जटाटवीकोटरान्तःकृतनीड़ाण्डजाश्च ये ।
प्ररूढ़वामलूराङ्गाः स्थाणुवद्धास्थिसञ्चयाः ॥")
वामलोचना, स्त्री, वामे चारुणी लोचने यस्याः ।
स्त्रीभेदः । इत्यमरः । २ । ६ । ३ ॥ (यथा,
हितोपदेशे । २ । १५९ ।
"नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः ।
नान्तकः सर्व्वभूतानां न पुंसां वामलोचना ॥")
वामवेधशुद्धिः, स्त्री, (वामे प्रतिकूले यो वेध-
स्तद्विषये शुद्धिविशोधनम् । यद्वा, वामेन विप-
रीतेन वेधेन शुद्धिः ।) स्वराश्यपेक्षया द्वादश-
चतुर्थनवमगृहस्थो विरुद्धोऽपि चन्द्रः यदि शुक्र-
शनिकुजजीवार्कयुक्तगृहात् सप्तमगृहे तिष्ठति
तदा नराणां अभिलषितफलदाता भवति ।
यदि तु सितशनिकुजजीवार्कयुक्तगृहात् दशम-
पञ्चमाष्टमगृहे तिष्ठति तदा नराणां स्वराश्य-
पेक्षया यथासंख्यं अष्टमपञ्चमद्वितीयगृहगोऽपि
चन्द्रः प्रचुरफलदाता भवति । यथा,—
"सितशनिकुजजीवार्कान्त इन्दुर्नराणां
व्ययसुखनवमस्थोऽपीष्टदाता तथैषाम् ।
स्वसुतनिधनगर्भान्त्यक्षपुत्त्रार्थगोऽपि
प्रचुरशुभफलं स्याद्वामवेधेन शुद्धिः ॥"
वामवेधत्वञ्च दृग्गणितेति एतमर्थेन वचनाग-
वचनाभ्यामेकार्थत्वाद्बोध्यम् ॥ * ॥
अथ दक्षिणवेधवामवेधकथनम् ।
"लाभविक्रमखशत्रुषु स्थितः
शोभनो निगदितो दिवाकरः ।
खेचरैः सुतसप्तजलान्त्यगै-
श्चार्किभिर्यदि न विध्यते तदा ॥
द्यूनजन्मरिपुलाभखस्थित-
श्चन्द्रमाः शुभफलप्रदस्तदा ।
खाब्जजान्त्यतिबन्धुधर्म्मगै-
र्विध्यते न विबुधैर्यदि ग्रहैः ॥
विक्रमाय रिपुगः शुभः कुजः
स्वान्तदान्त्यसुतधर्म्मगैः खगैः ।
येन विद्ध इनसूनुरप्यसौ
किन्तु धर्म्मदृशिना न विध्यते ॥
स्वाम्बुशत्रुमतिस्वायगः शुभो
ज्ञस्तदा न खलु विध्यते यदा ।
व्यात्मजत्रिनवकाद्यनैधन-
प्रान्त्यगैर्विविधुभिर्नभश्चरैः ॥
स्वायधर्म्मतनयद्युनस्थितो
नाकनायकपुरोहितः शुभः ।
रिपुपरन्ध्रखजलत्रिगैर्यदा
विध्यते गगनचारिभिर्नहि ॥
व्यास्तुताष्टमतपोव्ययायगो
विद्ध व्यास्तु जिदशोभनः स्तुतः ।
नैधनास्ततनुकर्म्मधर्म्मधी-
लाभवैरिसहजस्थखेचरैः ॥"
इति ज्योतिस्तत्त्वम् ॥
वामा, स्त्री, (वमति सौन्दर्य्यं इति । वम + ज्वला-
दित्वात् ण । टाप् । यद्वा, वमति प्रतिकूल-
मेवार्थं कथयति । यद्वा, वामः कामोऽस्त्यस्या
इति अर्श आदित्वात् अच् ।) सामान्या
स्त्री । इत्यमरः । २ । ६ । २ ॥ (यथा, गीत-
गोविन्दे । १ । ४६ ।
"श्लिष्यति कामपि चुम्बति कामपि कामपि
रमयति वामाम् ।
पश्यति सस्मितचारुपरामपरामनुगच्छति
रामाम् ॥")
दुर्गा । यथा,—
"वामं विरुद्धरूपन्तु विपरीतन्तु गीयते ।
वामेन सुखदा देवी वामा तेन मता बुधैः ॥"
इति देवीपुराणे ४५ अध्यायः ॥
अपि च ।
"बालान्तु बाल्यदाविद्यभावाभ्यामपि पूजयेत् ।
श्मशानभैरवीं देवीमुग्रतारां तथैव च ।
उच्छिष्टभैरवीं चर्च्चीं तारां त्रिपुरभैरवीम् ।